# ९ नवम दशकः - भुवनेश्वरी दर्शनः

एकार्णवेऽस्मिन् जगति प्रलीने दैत्यौ हरि र्ब्रह्म वधोद्यतौ तौ ।
जघान देवि त्वदनुग्रहेण त्वदिच्छ यैवागम दत्र रुद्रः ॥ ९-१॥

एको विमान स्तरसाऽऽगतः खात् त्रिमूर्त्य विज्ञात गतिस्त्वदीयः ।
त्वत्प्रेरिता आरुरुहु स्तमेते स चोत्पतन् व्योम्नि चचार शीघ्रम् ॥ ९-२॥

वैमानिकाश्चो द्गतयः सशक्रं दिवं सपद्मोद्भव सत्यलोकम् ।
सरुद्र कैलास ममी सविष्णु वैकुण्ठ मप्युत्पुलका अपश्यन् ॥ ९-३॥

अदृष्ट पूर्वा नितरां स्त्रिमूर्तीन् स्थानानि तेषा मपि दृष्टवन्तः ।
त्रिमूर्तयस्ते च विमोह मापुः प्राप्तो विमानश्च सुधा समुद्रम् ॥ ९-४॥

त्वद्भ्रूलता लोल तरङ्गमालं त्वदीय मन्दस्मित चारु फेनम् ।
त्वन्मञ्जु मञ्जीर मृदुस्वनाढ्यं त्वत्पाद युग्मोप मसौख्यदं च ॥ ९-५॥

तन्मध्यतस्ते ददृशु र्विचित्र प्राकार नानाद्रुलता परीतम् ।
स्थानं मणिद्वीप मदृष्टपूर्वं क्रमाच्छिवे त्वां च सखी समेताम् ॥ ९-६॥

ज्ञात्वा द्रुतं त्वां हरिराह दातः त्रिनेत्र धन्या वयमद्य नूनम् ।
सुधासमुद्रो ऽयमनल्प पुण्यैः प्राप्या जगन्मातृ निवास भूमिः ॥ ९-७॥

सा दृश्यते रागिजनै रदृश्या मञ्चे निषण्णा बहुशक्ति युक्ता ।
एषैव दृक् सर्वमिदं च दृश्यं अहेतुरेषा खलु सर्वहेतुः ॥ ९-८॥

बालः शयानो वटपत्र एक एकार्णवेऽपश्य मिमां स्मितास्याम् ।
ययैव मात्रा परिलालितोऽहं एनां समस्तार्ति हरां व्रजेम ॥ ९-९॥

रुध्यामहे द्वारि यदि स्तुवामः तत्र स्थिता एव वयं महेशीम् ।
इत्यच्युते नाभिहिते विमानः त्वद्गोपुर द्वार मवाप देवि ॥ ९-१०॥

आयाम्यहं चित्त निरोध रूप विमानतस्ते पद मद्वितीयम् ।
न केनचि द्रुद्धगतो भवानि त्वामेव मातः शरणं व्रजामि ॥ ९-११॥

** बालरवि द्युति मिन्दु किरीटां तुङ्गकुचां नयनत्रय युक्ताम् ।
स्मेरमुखीं वरदाङ्कुश पाशा भीतिकरां प्रभजे भुवनेशीम् ॥ **